Topic 44 अदन्त सर्वनाम 3

पूर्वपरावरदक्षिणोत्तरापरापराधराणि व्यवस्थायामसंज्ञायाम् ।

एतेषां व्यवस्थायामसंज्ञा गणसूत्रात् सर्वत्र या प्राप्ता सा जसि वा स्यात् । पूर्वे, पूर्वाः । असंज्ञायाम् किम् - उत्तराः कुरवः । स्वाभिधेया - पेक्षावधि नियमो व्यवस्था । व्यवस्थायां किम् - दक्षिणा गायकाः । कुशला इत्यर्थः ।

स्वमज्ञातिधनाख्यायाम् ।

ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा - जसि वा । स्वे, स्वाः = आत्मीयाः आत्मन इति - वा । ज्ञातिधनवाचिनस्तु स्वाः - ज्ञातयोऽर्थी वा ।

अन्तरं बहिर्योगोपसंव्यानयोः ।

बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा । अन्तरे अन्तरा वा गृहाः - बाह्या इत्यर्थः । अन्तरे अन्तरा वा शाटकाः - परिधानीया इत्यर्थः ।

पूर्वादिभ्यो नवभ्यो वा ।

एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । एवं - परादीनामपि । शेषं सर्ववत् ।

प्रथम - चरम - तयाल्पार्धकतिपय - नेमाश्च ।

एते जसि उक्तसंज्ञाः स्युः । प्रथमे, प्रथमाः । तयः प्रत्ययः - द्वितये, द्वितयाः । शेषं रामवत् । नेमे, नेमाः, शेषं सर्ववत् ।

P.T.O.